ॐ

पूजा संग्रह.

यजुर्वेदी त्रिकाल संध्या, श्री पार्थिव पूजा, मूळ तथा गुजराती, श्री सुक्त, यज्ञोपवितधारणविधि.

ॐ

अथ यजुर्वेदी त्रिकालसंध्या.

अथ प्रातःसंध्याप्रयोगः ॥ ॐतत्सत् ॥ ॐकेशवायनमः स्वाहा। ॐनारायणनमःस्वाहा। ॐमाधवायनमःस्वाहा। इतिआचमनम्॥ अथ गायत्र्य भस्माभिमंत्र्यभस्मधारणमंत्रः। त्र्यायुषंजमदग्नेः कश्यपस्य त्र्यायुषम्। यद्देवेषुत्र्यायुषंतन्नोऽस्तु त्र्यायुषम् ॥ इति मंत्रेणभस्मत्रिपुंड्रंधारयित्वा पश्चात् रुद्राक्षमाला धारणम् ॥ तस्यमंत्रः ॥ ॐमानस्तोकेतनये मानऽआयुषि मानोगोषुमानोऽअश्वेषुरीरिषः। मानोवीरान् रुद्रभामिनो वधीर्हविष्मन्तःसदामित्वाहवामहे ॥ इति-मंत्रेणरुद्राक्षधारणम् ॥ अथाचमनम् ॥ ॐकेशवायनमःस्वाहा ॥ ॐ नारायणायनमःस्वाहा ॥ ॐमाधवायनमःस्वाहा॥ इतिआचमनम् ॥

प्रा० अंगुष्ठमा॰ ।शिखांगायत्र्यानैर्ऋत्यांबध्वातूष्णींजुटिकांबध्वा ॥ प्राणा- त्रि०
॥२॥ यामः ॥ ॐविष्णवेनमः ॥ ॐवाक्२ ॥ ॐप्राणः२ ॥ ॐचक्षुः२ ॥
ॐश्रोत्रं२ ॥ ॐनाभिः२ ॥ ॐहृदयम् ॥ ॐकण्ठः ॥ ॐमुखम् ॥
ॐशिरः ॥ ॐशिखा ॥ ॐबाहुभ्यां॰ ॥ बलम् ॥ ॐअपवि॰ःपवित्रो-
वासर्वावस्थांगतोऽपिवा ॥ यःस्मरे॰ण्डरीकाक्षं सबाह्याभ्यंतरःशुचिः ।
ॐपुंडरिकाक्षायनमः । ॐअद्येत्यादि॰ ममोपात्तदुरितक्षयद्वाराश्रीपर-
मेश्वरप्रीत्यर्थं प्रातःसंध्यामुपास्ये । अथाभिषेकमं॰ः ॥ ॐभूःपुनातु ।
ॐभुवःपुना॰ । ॐस्वःपुनातु। ॐमहपु॰ ॥ ॐजनपु॰ ॥ॐतपःपु॰ ॥
ॐसत्यंपु॰ ॥ ॐतत्सवि॰ यातसर्वपुना॰ ॥ ॐपृथ्वी॰तिमं॰स्यमेरु-
पृष्ठऋषिःकूर्मो देवता सुतलं छंदः आसनेविनियोगः ॥ ॐपृथ्वि
त्वया॰॰लोका देवित्वंविष्णुनाधृता ॥ त्वंचधारय मांदेविपवित्रंकुरु- ॥२॥

नासनम् ॥ ब्रह्मणेइदमासनम् ॥ अथकरन्यासः ॥ ॐभूःअंगुष्ठाभ्यां-
नमः ॥ ॐभुवःतर्जनीभ्यांनमः ॥ ॐस्वःमध्यमाभ्यांनमः ॥ ॐतत्सवि०
अनामिकाभ्यांनमः ॥ ॐभर्गोदेवस्यधीमहिकनिष्ठिकाभ्यांनमः ॥
ॐधियोयोनःप्रचोदयात् करतलकरपृष्ठाभ्यांनमः ॥ अथषडंगन्यासः ॥
ॐभूःहृदयायनमः ॥ ॐभुवःशिरसेस्वाहा ॥ ॐस्वःशिखायैवषट् ॥
ॐतत्सवितुर्वरेण्यंकवचायहुम् ॥ ॐभर्गोदेवस्यधीमहिनेत्रत्रयायवौषट्
ॐधियोयोनःप्रचोदयात् अस्त्रायफट् ॥ अथप्रणवन्यासः ॥ ॐअकारं-
नाभौ ॥ ॐउकारंहृदये ॥ ॐमकारंमूर्ध्नि ॥ अथव्याहृतिन्यासः ॥
ॐभूःपादयोः ॥ ॐभुवःजान्वोः ॥ ॐस्वःऊर्वोः ॥ ॐमहःजठरे ॥
ॐजनःकंठे । ॐ तपःमुखे । ॐसत्यांशिरासि । अथगायत्र्यक्षरन्यासः ।
ॐतकारंपादांगुष्ठयोः । ॐसकारंगुल्फयोः । ॐविकारंजंघयोः । ॐ

तु[illegible]र्व्वोः । ॐवकारंऊर्वोः । ॐ[illegible]रंगुदे । ॐणिकारंलिंगे । ॐयकारंकट्याम् । ॐभकारंनाभौ । ॐगोकारंउदरे । ॐदेकारंस्तनयोः । ॐवकारंहृदये । ॐस्यक रंकंठे । ॐधीकारं[illegible]खे । ॐमकारंतालुदेशे । ॐहिकारंनासिकाग्रे । ॐधिकारंने[illegible]योः । ॐयोकारंभ्रुवोर्मध्ये । ॐ द्वितीयंयोकारंल्ललाटे । ॐनकारंपूर्वमुखे । ॐप्रकारंदक्षिणमुखे । ॐ चा[illegible]रंपश्चिममुखे । ॐदकारंउत्तर[illegible]खे । ॐयाकारंमूर्ध्नि ॥ ॐव्यंजनंतकारंसर्वव्यापकम् । शिरोन्यासः ॥ ॐआपागुह्ये । ॐज्योतिश्चक्षुषि । ॐरसोवक्त्रे । ॐअमृतंजानुनि । ॐब्रह्महृदये । ॐभूःपादयोः । ॐभुवःनाभौ । ॐस्वर्ल्ललाटे । ॐकारंमूर्ध्नि ॥ अथगायत्र्यावाहनम् ॥ गायत्रींत्र्यक्षरांबाला साक्षसूत्र[illegible]मंडलुम् । रक्तांगीरक्तवस्त्रांचहंसवाहनसंस्थिताम् । ऋग्वेदकृतोत्संगांचतुर्वक्त्रांचतुर्भुजाम् ।

ब्रह्माणींब्रह्मदैवत्यांब्रह्मलोकनिवासिनीम् । आवाहयाम्यहंदेवीमायां-
तींसूर्यमंडलात् । आगच्छवरदेदेवि त्र्यक्षरेब्रह्मवादिनि । गायत्रिछंद-
सांमातब्रह्मयोनेनमोस्तुते । इति आवाहनम् । ॐकारस्यब्रह्माऋषिः
गायत्रीछंदः परमात्मादेवतासर्वकर्मारंभेविनियोगः । ॐसप्तव्याहृति-
नांविश्वामित्रजमदग्निभरद्वाजगौतमात्रिवसिष्ठकश्यपाऋषयः । अग्नि-
वायुसूर्यबृहस्पतिवरुणेन्द्रविश्वेदेवादेवताः । गायत्र्युष्णिगनुष्टुप्बृहती-
पंक्तित्रिष्टुप्जगत्यश्छंदांसि तत्सवितुरितिविश्वामित्रऋषिःब्रह्माग्निवायु-
सूर्यादेवताः द्विपदागायत्रीछंदः सर्वेषांप्राणायामेविनियोगः । ॐभूः
ॐभुवः ॐस्वः ॐमहः ॐजनः ॐतपः ॐसत्यं ॐतत्सवितुर्व-
रेण्यंभर्गोदेवस्यधीमाहिधियोयोनःप्रचोदयात् ॐआपोज्योतीरसोमृतं-
ब्रह्मभूर्भुवःस्वरोम् ॥ इतिनवधात्रिर्वाजपित्वा । अथांबुप्राशनम् ॥

प्रा० ॐसूर्य्यश्चमेतिनारायणऋषिः । सूर्योदेवता । अनुष्टुप्छंदः । अंबु- त्रि०
॥४॥ प्राशने विनियोगः । ॐसूर्य्यश्चमामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः
पापेभ्योरक्षंताम् ॥ यद्रात्र्यापापमकार्षंमनसावाचाहस्ताभ्यां पद्भ्या-
मुदरेणशिश्नारात्रिस्तदवलुंपतुयत्किंचिदुरितंमयिइद[redacted]योनौ
सूर्येज्योतिषिजुहोमिस्वाहा । ततो[redacted] ॥ ॐआपोहिष्ठेति-
त्र्यृचस्यसिंधुद्वीपऋषिः आपोदेवता गायत्रीछंदःमार्जनेविनियोगः ॥
ॐआपोहिष्ठामयोभुवः । ॐतानऊर्जेदधातन । ॐमहेरणायचक्षसे ।
ॐयोवःशिवतमोरसः । ॐतस्यभाजयतेहनः । ॐउशतीरिवमातरः ।
ॐतस्माऽअरंगमामवः । ॐयस्यक्षयायजिन्वथ । ॐआपोजनयथा-
चनः । इतिनवभिः पादैःप्रतिपादंशिरोभिषिंचेत्कुशैः ॥ ॐसुमित्रिया-
दुर्मित्रियाइतिद्वयोः प्रजापतिर्ऋषिः आपोदेवताअनुष्टुप्छंदः जला- ॥४॥

वग्रहेणविनियोगः । ॐसुमुत्रियानऽआपओपधयः संतुदुर्मित्रिया-
स्तस्मैसंतुयोस्मान्द्वेष्टियं चव्वयंद्विष्मः । ॐद्रुपदादिवेतिकोकिलराज-
पुत्रऋषिः । आपोदेवता अनुष्टुप्छंदः अघमर्षणे विनियोगः ॥
ॐद्रुपदादिवमुमुचानः स्विन्नःस्नातोमलादिवपूतंपवित्रेणेवाज्यमापः
शुन्धंतुमैनसः ॥ ॐऋतंचसत्यंचेत्यघमर्षणऋषिः भावभृथोदेवता
अनुष्टुप्छंदः अघमर्षणेविनियोगः । ॐऋतंचसत्यंचाभीद्धात्तपसो-
ऽध्यजायतततोरात्र्यजायत । ततः समुद्रोऽअर्णवः समुद्रादर्णवादधि-
संवत्सरोऽअजायत । अहोरात्राणिविदधद्विश्वस्यमिषतोवशीसूर्या-
चन्द्रमसौ धातायथापूर्वमकल्पयद्दिवंचपृथिवींचांतरिक्षमथोस्वः ॥ तत-
उत्थायगंधपुष्पजलमिश्राण्यंजलौगृहीत्वा गायत्र्यार्घत्रयंदद्यात् ॥
उद्वयमुदुत्यमितिप्रस्कण्वऋषिः सूर्योदेवता अनुष्टुप्छन्दः ॐचित्रं-

श्रा० देवा॥सिदिकुत्सांगिरसऋषिः सूर्योदेवता त्रिष्टुप्छन्दः ॐतच्चक्षुरिति त्रि०
॥८॥ दध्यंङ्गाथर्वणऋषिः सूर्योदेवता उष्णिक्छन्दः सूर्योपस्थानेविनियोगः॥
ॐउद्वयंतमसस्परिस्वः पश्यंतऽउत्तरम्॥ देवं देवत्रासूर्यमगन्मज्योति-
रुत्तमम् ॥१॥ ॐउदुत्यं जातवेदसंदेवंवहन्तिकेतवः ॥ दृशेविश्वाय
सूर्यम् ॥२॥ ॐचित्रंदेवानामुदगादनीकंचक्षुर्म्मित्रस्य वरुणस्याग्नेः ॥
आप्राद्यावापृथिवीअन्तरिक्षꣳ सूर्यआत्माजगतस्तस्थुषश्च ॥३॥ ॐ
तच्चक्षुर्द्देवहितं पुरस्ताच्छुक्रमुच्चरेत् पश्येमशरदःशतंजीवेमशरदः ॥
शतꣳशृणुयामशरदःशतंप्रब्रवामशरदः शतमदीनाः स्यामशरदः
शतंभूयश्चशरदःशतात् ॥ ४ ॥ ॐतेजोसीतिपरमेष्ठीप्रजापतिर्ऋषिः
यजुर्जगतीच्छंदः आज्यंदेवता यजुर्गायत्र्यावाहनेविनियोगः॥ ॐ
तेजोसिशुक्रमस्यमृतमसिधामनामासि॥ प्रियंदेवानामनाधृष्टंदेव- ॥८॥

यजनम सि ॥ ॐतुरीयपदस्यविमलऋषिः गायत्रीछंदः परमात्मादेवता
गायत्र्युपस्थाने विनियोगः ॥ ॐगायत्र्यस्येकपदीद्विपदीत्रिपदीच-
तुष्पद्यपद्यसिनहिपद्यसे नमस्तेतुरीयायदर्शतायपदायपरोरजसेसाव-
दोम् ॥ अद्येत्यादिममाशेषपापक्षयार्थे गायत्र्यागायत्रीछंदोविश्वामित्र-
ऋषिः सविता देवताऽग्निर्मुखं ब्रह्माशिरोविष्णुर्हृदय ॐ रुद्रःशिखा-
पृथिवीयोनिः प्राणापानव्यानोद [illegible] श्वे[illegible]र्णासांख्या-
यनसगोत्रागायत्रीचतुर्वि ॐ शत्यक्षरात्रिपदाषट्कुक्षिः पंचशीर्षोप-
नयनेविनियोगः ॥ गायत्र्याषडंगन्यासंकृत्वा ॥ अथध्यानम् ॥
मुक्ताविद्रुमहेमनीलधवलच्छायैर्मुखैस्त्रीक्ष[illegible]न्दुनिबद्ध[illegible]कुटां
तत्त्वार्थवर्णात्मिकाम् । गायत्रींवरदाभयां[illegible]शकशाःशुभ्रंकपालंगुणं-
शंखंचक्रमथारविन्दयुगलंहस्तैर्वहंतींभजे ॥ अथमुद्रा ॥ [illegible]

विततंविस्त तंतथा । द्विमुखंत्रिमुखंचैवचतुष्पंचमुखं तथा ॥ १ ॥
षण्मुखाधोमुखंचैवव्यापकांजलिकं तथा । श टंयमपाशंचग्रथितं-
चोन्मुखोन्मुखम् । पल्लवं मु ष्टिकं चैवमत्स्यः कूर्मोवराहकम् । सिंहाक्रांतं
मह क्रांतंमुद्गरंपल्लवंतथा ॥३॥ चतुर्विंशतिमुद्राश्च गायत्र्याःसंप्रदर्श-
येत् ॥ अथजपः ॥ ॐतत्सवि रितिविश्वामित्रऋषिः गायत्रीछंदः
सविताद [redacted] ऽशेषप पक्षयार्थेत्रिपद [redacted] जपंकरिष्ये । ततो
जपः । १०८ । जपांतेषडंगन्यासंकृत्वा ॥ सुरभिर्ज्ञानंवैराग्यंयोनिः
शंखोथपं जम् । लिंगंनिर्वाणकं वजपांतेष्टौप्रदर्शयेत् । अनेना-
ष्टोत्तरशतसंख्याकेन गायत्रीजपाख्येनकर्मणाश्रीब्रह्मस्वरूपीसविता-
देवता प्रीयतांनमम ॥ ॐविश्वतश्चक्षुरितिविश्वकर्माभौवनऋषिः
विश्वकर्मादेवता त्रिष्टुपछंदः प्रदक्षिणेविनियोगः । ॐविश्वतश्चक्षुरुत-

विश्वतोमुखोविश्वतोबाहुरुतविश्वतस्पात् । संबाहुभ्यांधमतिसंपतत्रै-
र्द्यावाभूमी जनयन्देवएकः । ॐदेवागातुविदइतिमनसस्पतिर्ऋषिः
वातोदेवता विराट्छन्दः विसर्जने विनियोगः ॐदेवागातुविदोगा-
तुमित ॥ मनसस्पत इमंदेवयज्ञ स्वाहाव्वातेधाः । यदक्षरपदभ्रष्टं-
स्वरव्यंजनवर्जितम् । तत्सर्वक्षम्यतांदेवि सूर्य्यलोकनिवासिनि । उत्तरे-
शिखरेजातेभूम्यांपर्वतमूर्द्धनि ॥ ब्राह्मणेभ्योभ्यनुज्ञातागच्छदेवियथा-
सुखम् ॥ ॐइतितत्सत् ॥ इतिप्रातःसंध्यासमाप्ता ॥



॥ श्रीगुंगुरुभ्योनमः ॥

॥ श्रीपार्थिवपूजा प्रारंभः ॥

आचम्य । प्राणानायम्य । शुभतिथौ अमुक गोत्रोत्पन्नोहं । अमुक देवशर्माहं । श्रीउमामहेश्वरदेवताप्रसादसिध्यर्थं पार्थिव लिंगपूजनमहं करिष्ये । तदंगवरुणपूजनमहं करिष्ये । गंगे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिंधु कावेरी जलेऽस्मिन्सान्निधिं कुरु । ब्रह्मांडोदरतीर्थानि करैः स्पृष्टानि ते रवे । तेन सत्ये नमे तीर्थं देहि दिवाकर । ॐ क्रोमिति अंकुशमुद्रया सूर्यमंडलात्तीर्थान्याकृष्य । तार्क्ष्येण निर्विषीकृत्य । अस्त्रेण संरक्ष्य । कवचेनानवगुंठ्य । धेन्वामृतीकृत्य । मूलेनाष्टवारमभिमंत्र्य । गंधाक्षतपुष्पैः संपूज्य । जगध्वनिमंत्रमातः स्वाहा । इति घंटां संपूज्य । अपवित्रः पवित्रो

वा सर्वावस्थांगतोऽपि वा । यः स्मरेद्देवमीशानं सबाह्याभ्यंतरः शुचिः । इति पूजाद्रव्याणि । आत्मानं च संप्रोक्ष्य । ततो ध्यायेत् ॥

अथ ध्यानम् ॥

वंदे देवमुमापतिं सुरगुरुं वंदे जगत्कारणम् ।
वंदे पन्नगभूषणं मृगधरं वंदे पशूनां पतिम् ॥
वंदे सूर्यशशांकवन्हिनयनं वंदे मुकुंदप्रियम् ।
वंदे भ[redacted]श्रयं च वरदं वंदे शिवं शंकरम् ॥ १ ॥

ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचंद्रावतंसं। रत्नाकल्पो ज्वलांगं परशुमृगवराभीतिहस्तं प्रसन्नम् ॥ पद्मासीनं समंतात्स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं । विश्वाद्यं विश्ववंद्यं निखिलभयहरं पंचवक्त्रं त्रिनेत्रम् ॥२॥ हरये नमः मृदाहरणं । महेश्वराय नमः जलसेचनं ।

शंभवे नमः पिंडीकरणं। शूलपाणये नमः लिंगसंघट्टणं। पिनाकधृषे नमः। आवाहितो भव। स्थापितो भव। सन्मुखो भव। सन्निरोधी भव। विमलीकरणम्। अवगुंठणम्। अमृतीकरणम्। इत्यावाहनादि सप्तमुद्राः प्रदर्श्य॥ ॐ आं ह्रीं क्रों हंसः सोऽहं स्वाहा पार्थिव लिंग मृण्मयमूर्तेः प्राण इह प्राणाः॥१॥ ॐ आं ह्रीं क्रों हंसः सोऽहं स्वाहा पार्थिवलिंग मृण्मय मूर्तेः जीव इह स्थितः ॐ आं ह्रीं क्रों हंसः सोऽहं स्वाहा पार्थिवलिंग मृण्मय मूर्तेः सर्वेन्द्रियाणि स्थितानि इहागत्य सुखं चिरं तिष्ठंतु स्वाहा। गर्भाधानादि पंच-दशसंस्कारसिध्यर्थं पंचदशप्रणवावृत्तिं करिष्ये। ॐ नमः शिवाय श्रीउमामहेश्वरदेवताभ्यां नमः नैवेद्यं सम० मूलं पादयोः पाद्यं समर्पयामि। मूलं अर्घ्यं सम० मूलं आचमनीयं सम०। मूलं

मधुपर्कस्नानं० । मूलं पयस्नानं सम० । मूलं दधिस्नानं सम० । मूलं घृतस्नानं सम० । मूलं मधुस्नानं सम० । मूलं शर्करास्नानं सम० मूलं गंधोदकस्नानं सम० । मूलं अभिषेकस्नानं सम० । अथ तर्पणं ॥ भवंदेवं तर्पयामि । शर्वंदेवं तर्प० । रुद्रंदेवं तर्प० । उग्रंदेवं तर्प० । भीमंदेवं तर्प० । पशुपतिंदेवं तर्प० । महान्तंदेवं तर्प० । ईशानं देवं तर्प० भवस्य देवस्य पत्नीं तर्प० । सर्वस्य देवस्य पत्नीं तर्प० । रुद्रस्य देवस्य पत्नीं तर्प० । उग्रस्य देवस्य पत्नीं तर्प० । भीमस्य देवस्य पत्नीं तर्प० । पशुपतेर्देवस्य पत्नीं तर्प० । महतोदेवस्य पत्नीं तर्प० । ईशानस्य देवस्य पत्नीं तर्प० । ॐ नमः शिवाय श्रीउमामहेश्वरदेवताभ्यांनमः वस्त्रोपवस्त्रार्थे यज्ञोपवीतार्थे अक्षतान्समर्पयामि । मूलं गंधं सम० । मूलं अक्षतान्सम० ।

मूलं पुष्पं मम० । मूलं बिल्वपत्रं मम० । त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुधं त्रिजन्मपापसंहारं एक बिल्वं शिवार्पणं ॥ त्रिशाखै-र्बिल्वपत्रैश्च अच्छिद्रैः कोमलैः शुभैः । तव पूजां करिष्यामि अर्पयामि सदाशिव ॥ दर्शनं बिल्वपत्रस्य स्पर्शनं पापनाशनं । अघोरपापनिर्मुक्तं एकबिल्वं शिवार्पणं ॥ अश्वत्थकोटि संस्थाप्य शतकोटि शिवालयं । कोटिकन्या महादानं एकबिल्वं शिवार्पणं ॥ तुलसीबिल्व निर्गुंडी जंबीर मलकं तथा । पंचबिल्वमितिख्यातं एकबिल्वं शिवार्पणम् ॥ काशीवास फलं पश्चात् कालभैरव दर्शनं । प्रयागमाधवं दृष्ट्वा एकबिल्वं शिवार्पणम् ॥ मूलं धूपं मम० । मूलं दीपं मम० । मूलं अमृतं नैवेद्यं मम० । मूलं उत्तरापोशनं मम० । मूलं हस्तप्रक्षालनं मम० । मूलं मुखप्रक्षालनं मम० । मूलं गंडूषं मम० ।

मूलं पाद्यं सम० । मूलं अर्घ्यं सम० । मूलं आचमनीयं सम० । मूलं फलं सम० । मूलं तांबूलं सम० । मूलं दक्षिणां सम० । मूलं नीरांजनदीपं सम० । मूलं मंत्र-पुष्पांजलि । मूलं नमस्कारान् सम० । अष्टौ दिशासु पूजयेत् । वामावर्तेन । पूर्वे भवाय क्षिति मूर्तये नमः । ईशान्ये शर्वायजलमूर्तये नमः । उत्तरे रुद्राय[illegible]मूर्तये नमः । वायव्ये उग्राय वायुमूर्तये नमः । पश्चिमे भीमायाकाशमूर्तये नमः । नैर्ऋत्ये पशुपतये यजमानमूर्तये नमः । इत्यक्षतैः संपूज्य । ॐ अस्य श्री शिवषडक्षरी महामंत्रस्य । वामदेव ऋषये नमः शिरसि । पंक्ति छंदसे नमः मुखे । श्रीउमामहेश्वरदेवताभ्यां नमः हृदये । ॐ बीजाय नमः गुह्ये । नमः शक्तये नमः पादयोः शिवायइति कीलकायनमः सर्वांगे । श्रीउमामहेश्वरप्रसादसिध्यर्थे जपे विनियोगाय नमः कृतांजलिः ।

पा० ॐ अंगुष्ठाभ्यांनमः हृदयाय नमः । नं तर्जनीभ्यां नमः शिरसे पू०
॥२०॥ स्वाहा । मं मध्यमाभ्यां नमः शिखायैवषट् । शिं अनामिकाभ्यां नमः
कवचया हुं । वां कनिष्ठिकाभ्यां नमः नेत्रत्रयाय वौषट् । यं करतल-
करपृष्ठाभ्यां नमः अस्त्राय फट् । ॐ भूर्भुवः स्वरोम् इति दिग्बंधः ।
अथ ध्यानम् । शांतं पद्मासनस्थं शशिधरमुकुटं पंचवक्त्रं त्रिनेत्रं ।
शूलं वज्रं च खड्गं परशुमभयदं दक्षिणांगे वहंतं । नागं पाशं च घंटां
डमरुकसहितं सांकुशं वामभागे । नानालंकारयुक्तं स्फटिकमणिनिभं
पार्वतीशं नमामि ॥ मूलं श्रीउमामहेश्वराभ्यां लंपृथिव्यात्मकं गंधं
सम० । इतिमानसं संपूज्यमूलं जपेत् १०८ । हृदयादि न्यासं कृत्वा
ध्यानं मानसं संपूज्य । देवतायै जपं निवेद्य । स्तुतिं कुर्यात् ॥२०॥
ॐकाररूपाय नमोक्षराय वपुषे वृषे । नमो नादात्मने तुभ्यं नमो

बिंदु कलात्मने ।।१।। अलिंग लिं[redacted] रूपातीत त्मने नमः।
त्वं माता मर्व लोकानां त्वमेव जग तः पिता । त्वं भ्रातावं
सुहृन्मित्रं त्वं गुरुस्त्वं [redacted]ः ।। नमस्ते भगव रुद्र भास्क-
रातीत तेजसे । भवायक्षितिरूपाय शर्वाय जलरूपिणे । रुद्राय
वन्हिरूपाय उग्राय वायुरूपिणे । भीमायाकाशरूपाय पशूनां पतये
नमः ।। यजम [redacted] रूपाय महादेवाय ते नमः । सोमरू[redacted] देवाय
ईशानः सूर्यमूर्तयेनमः । इत्यष्टौ भगवानरुद्रस्तुवन्तः प पनाशनं ।
विश्वेशो जनको उमा च जननी गंगा च मात ष्वसा । धुंडि
भैरव दं[redacted]णि सदृशा जेष्ठा मम भ्रातरः । श्री काशी मणिकर्णिका
च भगिनि भार्या ममेयं मतिः । सत्कर्माणि सुता क्षमा च दुहिता
काश्यां कुटुंबं मम । सांतं यांतं त्रिवारं [redacted]तं यो [redacted]ीति

प्रदोषे । पश्यन् विश्वेशलिंगं वृषवृषणकरश्रृंगमध्येन दृग्भ्यां । सांगा-
वेदाह्यधीता क्रमपदसहिता मंत्रकोटीस्तु जप्त्वा त्रैलोक्यं तस्य वश्यं
स भवति शिवसायुज्यवान् धौतपापः । हर ॐ २ इति वदन् कर-
चरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वापराधं ।
विहितमविहितं वा सर्वमेतद् क्षमस्व । जयजयकरुणाब्धे श्रीमहादेव-
शंभो ॥ प्रातः काले शिवं दृष्ट्वा नैशंपापं व्यपोहति आजन्मकृत
माध्याह्ने सायाह्ने सप्तजन्मजं ॥ मेरूकांचनदत्तानां गवांकोटि
शतैरपि । पंचकोटि तुरंगाणां तत्फलं शिवदर्शनं । इतिप्रार्थ्य ।
यत्कृत्यं तन्नकृतं यदकुत्यंकृत्यवत्तदाचरितं उभयोः प्रायश्चित्तं शिव-
तन्नामाक्षर द्वयोच्चरितं शिवशिव श्रीउमामहेश्वराभ्यांनमः । प्रार्थना
सम० । महादेवायनमः क्षमस्व संहार मुद्रया तत्तेजो ब्रह्मरंध्रादि

मूलाधारांतं नीत्वा [redacted]ण हृदयमानीय संस्थाप्य । चंडेश्वरा० निर्माल्यविसर्जनं । चंडरूपा० विसर्जनं । इति पार्थिव-[redacted] संपूर्णं ॥ यांतु देव गणाः सर्वे पूजामादाय पार्थिवीम् । इष्टकाम प्रसिध्यर्थं पुनराग[redacted] च । विश्वेश्वरार्पणमस्तु । श्री [redacted]ार्पणमस्तु ॥ हरिः ॐ तत्सत् ॥



॥ શ્રીગું ગુરૂભ્યોનમઃ ॥

શ્રી પાર્થીવપૂજા પ્રારંભઃ

આચમ્ય । પ્રાણાનાયમ્ય । શુભતિથૌ અમુક ગોત્રોત્પન્નોહં । અમુક દેવશર્માહં । શ્રીઉમામહેશ્વરદેવતાપ્રસાદસિધ્યર્થં પાર્થિવ લિંગપૂજનમહં કરિષ્યે । તત્રાદૌ ગણપતિસ્મરણં કલશઘંટા દીપપૂજનં ચકરિષ્યે । તદંગવરૂણપૂજન મહં કરિષ્યે । ગંગે ચ યમુને ચૈવ ગોદાવરિ સરસ્વતિ । નર્મદે સિંધુ કાવેરી જલેસ્મિન્સન્નિધિં કુરૂ । બ્રહ્માંડોદરતીર્થાનિ કરૈઃ સ્પષ્ટાનિ તે રવે । તેન સત્યે નમે દેવ તીર્થં દેહિ દિવાકર । ૐ દ્રૌમિતિ અંકુશમુદ્રયા સૂર્યમંડલાત્તીર્થાન્યાકુષ્ય । તાર્ક્ષ્યેણ નિર્વિષીકૃત્ય । અસ્ત્રેણ સંરક્ષ્ય । કવચેનાવગુંઠય । ધેન્વામૃતીકૃત્ય । મૂલેનાષ્ટવારમભિમંત્રય । ગંધાક્ષતપુષ્પૈઃ સંપૂજ્ય । જગધ્વનિમંત્રમાતઃ સ્વાહા । ઇતિ ઘંટાં સંપૂજ્ય । અપવિત્રઃ પવિત્રો વા સર્વાવસ્થાંગતોપિ વા । યઃ સ્મરેદેવમીશાનં સબાહ્યાભ્યંતરઃ શુચિઃ । ઇતિ પૂજાદ્રવ્યાણિ । આત્મનં ચ સંપ્રોક્ષ્ય । તતો ધ્યાયેત્ ॥ અથ ધ્યાનમ્ ॥

વંદે દેવઉમાપતિં સુરગુરું વંદે જગત્કારણમ્ ॥
વંદે પન્નગભૂષણં મૃગધરં વંદે પશૂનાં પતિમ્ ।
વંદે સૂર્યશશાંકવન્હિનયનં વંદે મુકુંદપ્રિયમ્ ॥
વંદે ભક્તજનાશ્રયં ચ વરદં વંદે શિવં શંકરમ્ ॥ ૧ ॥
ધ્યાયેન્નિત્યં મહેશં રજતગિરિનિભં ચારુચંદ્રાવતંસં ।
રત્નાકલ્પોજ્જ્વલાંગં પરશુમૃગવરાભીતિહસ્તં પ્રસન્નમ્ ॥
પદ્માસીનં સમંતાત્સ્તુતમમરગણૈર્વ્યાઘ્રકૃતિં વસાનં ।
વિશ્વાદ્યંવિશ્વવંદ્યં નિખિલભયહરં પંચવક્ત્રં ત્રિનેત્રમ્ ॥ ૨ ॥

॥ૐ॥ હરયેનમઃ મૃદાહરણં । મહેશ્વરાયનમઃ જલસિચનં । શંભવે નમઃ પિંડીકરણં । શૂલપાણયે નમઃ લિંગસંઘટ્ટણં । પિનાકધૃષે નમ । આવાહિતો ભવ । સ્થાપિતો ભવ । સન્મુખો ભવ । સન્નિરોધો ભવ । વિમલીકરણમ્ । અવગુંઠણમ્ । અમૃતીતકરણમ્ । ઇતિ આવાહનાદિ સપ્તમુદ્રાઃ પ્રદર્શ્ય ॥ ૐ આં રીંમ ક્રોં હંસઃ સોહં સ્વાહા પાર્થિવ લિંગ મૃણ્મયમૂર્તેઃ પ્રાણ ઈહ પ્રાણાઃ ૧ ૐ આં રીંમ ક્રોં હંસઃ સોહં સ્વાહા પાર્થિવલિંગ મૃણ્મય મૂર્તેઃ જીવ ઈહ સ્થિતઃ

ૐ આં રીમ ક્રોં હંસ સોહં સ્વાહા પાર્થિવ લીંગ મહમય મૂર્તે સર્વેન્દ્રિયાણિ સ્થિતાનિ ઈહાગત્ય સુખં ચિરં તિષ્ઠતુ સ્વાહા। ગર્ભાધાનાદિ પંચદશસંસ્કાર-સિધ્યર્થં પંચદશપ્રણવાવૃત્તિં કરિષ્યે। ૐ નમઃ શિવાય શ્રીઉમામહેશ્વરદેવતાભ્યાં નમઃ નૈવેદ્યં સમ૦ મૂલં પાદયાઃ પાદ્યં સમર્પયામિ। મૂલં અર્ઘ્યં સમ૦। મૂલં આચમનીયં સમ૦। મૂલં મધુપર્કસ્નાનં સમ૦। મૂલં પયસ્સ્નાનં સમ૦। મૂલં દધિસ્નાનં સમ૦। મૂલં ઘૃતસ્નાનં સમ૦। મૂલં મધુસ્નાનં સમ૦। મૂલં શર્કરાસ્નાનં શમ૦। મૂલં અભિષેકસ્નાનં સમ૦। અથ તર્પણં। ભવંદેવં તર્પયામિ। સર્વંદેવં તર્પ૦। રૂદ્રંદેવં તર્પ૦। ઉગ્રંદેવં તર્પ૦। ભીમંદેવં તર્પ૦। પશુપતિંદેવં તર્પ૦। મહાદેવં તર્પ૦। ઈશાનંદેવં તર્પ૦। ભવસ્ય દેવસ્ય પત્નીં તર્પ૦। શર્વસ્ય દેવસ્ય પત્નીં તર્પ૦। રૂદ્રસ્ય દેવસ્ય પત્નીં તર્પ૦। ઉગ્રસ્ય દેવસ્ય પત્નીં તર્પ૦। ભીમસ્ય દેવસ્ય પત્નીં તર્પ૦। પશુપતેર્દેવસ્ય પત્નીં તર્પ૦। મહતો દેવસ્ય પત્નીં તર્પ૦। ઈશાનસ્થ દેવસ્ય પત્નીં તર્પ૦। ૐ નમઃ શિવાય શ્રી ઉમામહેશ્વરદેવતાભ્યાં નમઃ વસ્ત્રોપવસ્ત્રાર્થે યજ્ઞોપવીતાર્થે અક્ષતાન્સમર્પયામિ। મૂલં ગંધં સમ૦। મૂલં અક્ષતાન્સમ૦। મૂલં પુષ્પં

સમ૦ । મૂલં બિલ્વપત્રં સમ૦ । ત્રિદલં ત્રિગુણાકારં ત્રિનેત્રં ચ ત્રિધાયુધં ત્રિજન્મપાપસંહારં એક બિલ્વં શિવાર્પણં ॥ ત્રિશાખૈર્નિલ્પત્રૈશ્ચ અચ્છિદ્રૈઃ કોમલૈઃ શુભૈઃ । તવ પૂજાં કરિષ્યામિ અર્પયામિ સદાશિવ ॥ દર્શનં બિલ્વપત્રસ્ય સ્પર્શનં પાપનાશનં । અઘોરપાપનિર્મુક્તં એકબિલ્વં શિવાર્પણં ॥ આશ્વર્થકોટિ સંસ્થાપ્ય શતકોટિ શિવાલયં । કોટિકન્યા મહાદાન એકબિલ્વં શિવાર્પણં ॥ તુલસીબિલ્વં નિર્ગુંડી જબીરામલક તથા ! પંચબિલ્વમિતિખ્યાતં એકબિલ્વં શિવાર્પણમ્ ॥ કાશીવાસ ફલં પશ્ચાત્ કાલભૈરવ દર્શનં । પ્રયાગમાધવં દૃષ્ટ્વા એકબિલ્વં શિવાર્પણમ્ ॥ મૂલં ધૂપં સમ૦ । મૂલં દીપં સમ૦ । મૂલં અમૃત નૈવેદ્યં સમ૦ । મૂલં ઉત્તરાપોશનં સમ૦ । મૂલં હસ્તપ્રક્ષાલનં સમ૦ । મૂલં મુખપ્રક્ષાલનં સમ૦ । મૂલં ગંડુષં સમ૦ । મૂલં પાદ્ય સમ૦ । મૂલં અર્ઘ્યં સમ૦ । મૂલં આચમનીયં સમ૦ । મૂલં ફલં સમ૦ । મૂલં તાંબુલં સમ૦ । મૂલં દક્ષિણાં સમ૦ । મૂલં નીરાંજનદીપં સમ૦ । આરતી મૂલં મંત્ર–

શ્રી હરિહરની આરતી—

પા૦ ॥૨૬॥

જય હરિ હરા, પ્રભુ જય હરિ હરા,
ગંગાધર ગિરિજાવર (૨) ઈશ્વર ૐકારા, હર, હર, હર, મહાદેવ
લક્ષ્મીવર ઉમિયાવર, શંકર શામળીયા પ્રભુ શંકર શામળીયા
હરિહર નટવર સ્વામી (૨) એકાંતે મળિયા, હર, હર૦
વ્યાઘ્રાંબર પીતાંબર, શિવ શ્યામે પહેર્યાં, પ્રભુ શિવ શ્યામે પહેર્યાં
કમલ નયન કેશવને (૨) શિવજીને ત્રિનયના, હર, હર૦
ચંદન ચડે ત્રિકમને શિવજીને ભસ્માંગે, પ્રભુ શિવજીને ભસ્માંગે
રામે હદીયે રાખ્યાં (૨) ઉમિયા અર્ધાંગે, હર, હર૦
કેવડો વ્હાલો કેશવને, શિવજીને ધંતુરો, પ્રભુ શિવજીને ધંતુરો
ત્રિકમને વ્હાલાં તુલસી (૨) શિવજીને બિલિ વ્હાલાં, હર, હર૦
કૌસ્તુભમણી કેશવને, શિવજીને રૂંઢમાળા, પ્રભુ શિવજીને રૂંઢમાળા,
મુક્તાફળ મોહનને (૨) શિવજીને સર્પ કાળા હર, હર૦

પૂ૦ ॥૨૬॥

મોર મુગટ મોહનને, શિવજીને જટાયું, પ્રભુ શિવજીને જટાયું
હરિ શંભુ સુખવાસી (૨) શિવજીને વાગે ડમરૂ, હર, હર૦
રામને રૂડાં રાજ્ય, શિવ ખંભે ઝોળી, પ્રભુ શિવ ખંભે ઝોળી.
રામને વાનર રીંછ (૨) શિવજીને ભૂત ટોળી. હર, હર૦
દ્વિભુજ, ચતુર્ભુજ, અષ્ટભુજ, દશ ભુજને સોહીયે પ્રભુ દશ ભુજને સોહીયે,
શિવજીને રૂપે ભજતાં (૨) ત્રિભુવન મન મોહિયે, હર, હર૦
નંદિ વાહન ખગ વાહન. શિવ ચક્ર ત્રિશુળધારી શિવ ચક્ર ત્રિશુળધારી,
ત્રિપુરારી મોરારી (૨) કર કમળાધારી, હર, હર૦
વૈકુંઠ વસે વિશ્વંભર, શિવજી કૈલાસે પ્રભુ શિવજી કૈલાસે
હરિ કાળા હર ગોરા (૨) તે તેને ધ્યાને હર, હર૦
એ બે એક સ્વરૂપ અંતર નવ ધરશો પ્રભુ અંતર નવ ધરશો.
ભોળા ભુધરને ભજતાં (૨) ભવસાગર તરશો. હર, હર૦
મોહન ને માધવ જો ભાવે ગાશો, જો ભાવે ગાશો.
હરિહરના ગુણ ગાતાં (૨) હરિ ચરણે જાશો. હર. હર૦

પુષ્પાંજલિં સમ૦ । મૂલં નમસ્કારાન્ સમ૦ । અષ્ટૌ દિશાસુ પૂજયેત્ । વામા-
વર્તેન । પૂર્વે ભવાય ક્ષિતિ મૂર્તયે નમઃ । ઈશાન્યે શર્વાયજલમૂર્તયે નમઃ । ઉત્તરે
રૂદ્રાયાગ્નિમુર્તયે નમઃ । વાયવ્યે ઉગ્રાય વાયુમુર્તયે નમઃ । પશ્ચિમે ભીમાયાકાશમૂર્તયે
નમઃ । દક્ષિણે મહાદેવાય સોમમૂર્તયે નમઃ । અગ્નયે ઈશાનાય સૂર્યમૂર્તયે નમઃ ।
ઈત્યક્ષતૈઃ સંપૂજ્ય । ૐ અસ્ય શ્રીશિવષડક્ષરી મહામંત્રસ્ય । વામદેવ ઋષયે
નમઃ શિરસિ । પંક્તિ છંદસે કમઃ મુખે । શ્રીઉમામહેશ્વરદેવતાભ્યાં નમઃ હૃદયે ।
ૐ વીજાય નમઃ ગુહ્યે । નમઃ શક્તયે નમઃ પાદયો શિવાયઈતિ કીલકાયનમઃ સર્વાંગે ।
શ્રીઉમામહેશ્વરપ્રસાદસિધ્યર્થે જપે વિનિયોગાય નમઃ કૃતાંજલિઃ । ૐ અંગુષ્ઠા-
ભ્યાંનમઃ હૃદયાય નમઃ । નં તર્જનીભ્યાં નમઃ શિરસે સ્વાહા । મં મધ્યમાભ્યાં
નમઃ શિખાયૈ વષટ્ । શિં અનામિકાભ્યાં નમઃ કવચયા હું । વા કનિષ્ઠકાભ્યાં
નમઃ નેત્રત્રયાય વૌષટ્ । યં કરતલકરપૃષ્ઠાભ્યાં નમઃ અસ્ત્રાય ફટ્ એવં હૃદીયાદી
ન્યાસં ॥ ૐ ॥ યદીયાહૃ નમઃ ॥ ૐ ॥ નમઃ શિરસે સ્વાહામં શિખાયૈવષટશિં
કવચાય હવાં નેત્રત્રયાય વૌષટયં અસ્ત્રાયફટ ૐ ભૂર્ભુવઃ સ્વરોમ્ ઇતિ દિગ્બંધન
અથ ધ્યાનમ્ । શાંત પદ્માસનસ્થં શશિધરમુકુટં પંચવક્ત્ર ત્રિનેત્રં । શૂલં વજ્ર

ચ ખડ્ગં પરશુમભયદં દક્ષિણાંગે વહંતં । નાગં પાશં ચ ઘંટાં ડમરુકસહિતં સાંકુશં વામભાગે । નાનાલંકારયુક્તં સ્ફટિકમણિનિભં પાર્વતીશં નામિ ॥ મૂલં શ્રીઉમા મહેશ્વરાભ્યાં નમઃ

લંપૃથિવ્યાત્મકં શ્રીઉમા મહેશ્વરાભ્યાં નમઃ ગંધં પરિકલ્પયામિ

હં આકાશાત્મકં	,,	,,	પુષ્પં	,,
યં વ્યાયાત્મકં	,,	,,	ધુપં	,,
રં વન્હન્યાત્મકં	,,	,,	દીપં	,,
વં અમૃત્માકં	,,	,,	નૈવેદ્યં	,,

સં સર્વશક્તિ પ્રકૃત્યાત્મકં સર્વોપચારાનં રાજોપચારનં ,,

સમ૦ ઇતિમાનસં સંપૂજ્યમૂલં જપેત્ ૧૦૮ । હૃદયાદિ ન્યાસં કૃત્વા ધ્યાનં માનસં સંપૂજ્ય । દેવતાયૈ જપં નિવેદ્યા સ્તુતિં કુર્યાત્ ૐકારરુપાય નમોક્ષરાય વપુષે વૃષો નમો નાદાત્મને તુભ્યં નમો બિંન્દુ કલાત્મને ॥ ૧ ॥ અલિંગ લિંગરુપાય રુપાતીતાત્મંને નમઃ । ત્વં માતા સર્વ લોકાનાં ત્વમેવ જગતઃ પિતા । ત્વં ભ્રાતાત્વં સુહૃન્મિત્ર ત્વં ગુરુસ્ત્વં પિતામહઃ ॥ નમસ્તે ભગવન્ રુદ્ર ભાસ્ક

રાતીત તેજસે । ભવાયક્ષિતિરુપાય શર્વાય જલરુપિણે । રુદ્રાય વન્હિરુપાય ઉગ્રાય વાયુરુપિણે । ભીમાયાકાશરુપાય પશૂનાં પતયે નમઃ ॥ યજમાનસ્વરુપાય મહાદેવાય તે નમઃ । સોમરુપાયદેવાય ઈશાનઃ સૂર્યમૂર્તયેનમઃ । ઈત્યાદો ભગવાનરુદ્રસ્તુવન્તઃ પાપનાશનં । વિશ્વેશો જનકો ઉમા ચ જનની ગંગા ચ માતૃષ્વસા । ઘુંડિ ભૈરવ દંડપાણિ સદૃશા જ્યેષ્ઠા મમ ભ્રાતરઃ । શ્રી કાશી મણિકર્ણિકા ચ ભગિની ભાર્યા મમેયં મતિઃ । સત્કર્માણિ સુતા ક્ષમા ચ દુહિતા કાશ્યાં કુટુંબં મમ । સાંતં યાંતં ત્રિવારં પ્રણવક સહિતં યો બ્રવીતિ પ્રદોષે । પશ્યન્ વિશ્વેશલિંગં વૃષવૃષણકરશ્રૃંગમધ્યેન દૃષ્ટ્યાં । સાંગાવેદાહ્યધીતા ક્રમપદસહિતા મંત્રકોટીસ્તુ જપ્ત્વા ત્રૈલોક્યં તસ્ય વશ્યં સ ભવતિ શિવસાયુજ્યવાન્ ધૌતપાપઃ । હર ૐ ઇતિ વદન્ કર ચરણ કૃતં વા કાયજં કર્મજં વા શ્રવણનયનજં વા માનસં વાપરાધં । વિહિતમવિહિતં વા સર્વમેતદ્ ક્ષમસ્વ । જયજયકરુણાબ્ધે શ્રીમહાદેવશંભો ॥ પ્રાતઃ કાલે શિવં દૃષ્ટ્વા નૈશંપાપં વ્યપોહતિ આજન્મકૃત માધ્યાન્હે સાયાન્હે સપ્તજન્મજં ॥ મેરુકાંચનદત્તાનાં ગવાંકોટિ શતૈરપિ । પંચકોટિ તુરંગાણાં તત્ફલં શિવદર્શનં । ઇતિપ્રાર્થ્ય । યત્કૃત્યં તન્નકૃતં યદકૃત્યંકૃત્યવત્તદા-

ચરિતં ઉભયોઃ પ્રાયશ્ચિત્તં શિવત નામાક્ષર દ્વયોચ્ચરિતં શિવશિવ શ્રીઉમામહે-
શ્વરાભ્યાનમઃ । પ્રાર્થના સમ૦ । મહાદેવાયનમઃ ક્ષમસ્વ સંહાર મુદ્રયા તત્તેજો
બ્રહ્મરંધ્રાદિ મૂલાધારાંતં નીત્વા કુંડલિનીમાર્ગેણ હૃદયમાનીય સંસ્થાપ્ય । ચંડેશ્વરા૦
નિર્માલ્યવિસર્જનં । ઇતિ પાર્થિવલિંગપૂજનં સંપૂર્ણ । યાંતુ દેવ ગણાઃ સર્વે
પૂજામાદાય પાર્થિવમ । ઈષ્ટ કામ પ્રસિધ્યર્થં પુનરાગમનાય ચ । વિશ્વેશ્વરાર્પણમસ્તુ ।
શ્રીસાંબસદાશિવાર્પણમસ્તુ ॥ હરિઃ ૐ તત્સત્ ॥

॥ શ્રી પાર્થીવપૂજા સમાપ્તઃ ॥

॥ श्री गणेशायनमः ॥

॥ अथ श्रीसूक्तप्रारंभः ॥

॥ ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ॥ चन्द्रां हिरण्यमयीं
लक्ष्मीं जातवेदो ममावह ॥ १ ॥ इत्यावाहनम् ॥ तांमऽआवह
जातवेदो लक्ष्मीमनपगामिनीम् ॥ यस्यां हिरण्यं विन्देयं गामश्वं
पुरुषानहम् ॥२॥ इत्यासनम् ॥ अश्वपूर्णां रथमध्यां हस्तिनादप्रमो-
दिनीम् ॥ श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥३॥ इति पाद्यम्॥
काँमोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ॥ पद्मे
स्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥ ४ ॥ इत्यर्घ्यम् ॥ चंद्रां
प्रभासां यशसा ज्वलन्तीं श्रियं लोके देवजुष्टामुदाराम् ॥ तां

पद्मिनीमीं शरणमहं प्रपद्ये ऽअलक्ष्मीर्मे नश्यतां त्वा वृणोमि ॥५॥
इत्याचमनम् ॥ आदित्यवर्णे तपसो ऽधिजातो वनस्पतिस्तव वृक्षो ऽथ
बिल्वः ॥ तस्य फलानि तपसा नुदंतु मायांतरायांश्चबाह्याऽअ-
लक्ष्मीः ॥ ६ ॥ इति स्नानम् ॥ उपैतु मांदेवसखः कीर्तिश्चमणिना
सह ॥ प्रादुर्भूतो सुराष्ट्रेऽस्मिन्कीर्तिमृद्धिं ददातुमे ॥७॥ इति वस्त्रम् ॥
क्षुत्पिपासामलाज्येष्ठामलक्ष्मींनाशयाम्यहम् ॥ अभूतिमसमृद्धिं च
सर्वां निर्णुद मे गृहात् ॥ ८ ॥ इति यज्ञोपवीतम् ॥ गन्धद्वारां
दुराधर्षां नित्यपुष्टां करीषिणीम् ॥ ईश्वरींसर्वभूतानां तामिहोपह्वये
श्रियम् ॥ ९ ॥ इति गन्धम् ॥ मनसःकाममाकूतिं वाचःसत्यमशी-
महि ॥ पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥ १० ॥
इति पुष्पम् ॥ कर्दमेन प्रजाभूतामयि संभ्रम कर्दम ॥ श्रियं

वासयं मे कुले मातरं पद्ममालिनीम् ॥११॥ इति धूपम् ॥ आपः
स्रजन्तु स्निग्धानि चिक्लीत वस मे गृहे ॥ निचदेवीं मातरं श्रियं
वासयं मे कुले ॥१२॥ इति दीपम् ॥ आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां
हेममालिनीम् ॥ सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो मआवह ॥१३॥
इति नैवेद्यम् ॥ आर्द्रां यःकरिणींयष्टिं पिङ्गलां पद्ममालिनीम् ॥
चन्द्रां हिरण्मयींलक्ष्मीं ज[redacted] मआवह ॥१४॥ इति तांबूलम ॥
तांमऽआवह जातवेदो लक्ष्मीमनपगामिनीम ॥ यस्यां हिरण्यं प्रभूतं
गावोदास्योश्वान्विन्देयं पुरुषानहम् ॥१५॥ इति प्रदक्षिणाम ॥ यः
शुचिःप्रयतोभूत्वाजुहुयादाज्यमन्वहम् ॥ सूक्तं पञ्चदशर्चञ्च श्रीकामः
सततं जपेत ॥१६॥ इति नमस्कारः ॥ इति श्रीसूक्तं समाप्तम् ॥

॥ अथ मध्याह्नसंध्या ॥

अ[redacted]ादिपूर्ववत् ॥ अथावाहनम् ॥ सावित्रींयुवतींशुक्लां-शुक्लवस्त्रांत्रिलोचनाम् । यजुर्वेदकृतोत्संगांवृ[redacted]त्रिशूलिनीम् । रुद्राणींरुद्रदैवत्यांरुद्रलोकनिवासिनीम् । आवाहयाम्य[redacted]-सूर्यमंडलात् । आगच्छवरदेदेवित्र्यक्षरेरुद्रवादिनि । सा[redacted]च्छंद-सांमातारुद्रयोनेनमोऽस्तुते ॥ इत्यावाहनम् ॥ शेषंपूर्ववत् ॥ अथांबु-प्राशनम् ॥ ॐआपःपुनंत्वितिकश्यपऋषिः आपोदे[redacted] गायत्रीच्छंदः अंबुप्राशनेविनियोगः । ॐआपःपुनंतुपृथिवींपृथिवीपूतापुनातुमाम् । पुनंतुब्रह्मणस्पतिर्ब्रह्मपूतापुनातुमाम् । यदुच्छिष्टमभोज्यंचयद्वादुश्च-[redacted] । सर्वंपुनंतुमामापोसतांचप्रतिग्रहं स्वाहा ॥ ततोद्विराच-मनम् । शे[redacted]त् । जपः । अनेन अमुकसंख्या[redacted]-ख्येन कर्मणाश्रीरुद्रस्वरूपीसवितादेवता प्रीयतां नमम ॥

॥ अथ सायंसंध्या ॥

आचमनादिपूर्ववत् । अथा[redacted] ॥ वृद्धांसरस्वतींकृष्णां-
पीतवस्त्रांचतुर्भुजाम् । शंखचक्रगदाप[redacted]ांग[redacted]हिनीम् । साम-
वेदकृतात्संगांतुर्वंकांचतुर्भुजाम् । आवाहयाम्यहंदेवीमायांतींसूर्यमंड-
लात् । आगच्छवरदेदेवि त्र्यक्षरेविष्णुवादिनि । भारतिच्छंदसांमात-
र्विष्णुयोनेनमोस्तुते । इत्यावाहनम् । शेषंपूर्ववत् ॥ अथांबु[redacted] ॥
ॐअग्निश्चमेतिनारायण[redacted]षिः अग्निर्देवता अनुष्टुप्छंदः अंबुप्राशने-
विनियोगः । अग्निश्च माममन्युश्चमन्युपतयश्चमन्युकृतेभ्यः पापेभ्यो-
रक्षंताम् । यदह्नापापमकार्षं मनसावाचाहस्ताभ्यांपद्भ्यामुदरेण शिश्ना
ऽहस्तदवलुंपतु यत्किंचिद्दुरितंमयिइदमहंमाममृतयोनौसत्येज्योति-
षिजुहोमिस्वाहा ॥ [redacted] । शेषंपूर्ववत् । जपः ॥ अनेन-

अमुकसंख्याकेनगायत्रीजपाख्येन कर्मणाश्रीविष्णुस्वरूपीसविता-
देवताप्रीयतां नमम ॥ ॐतत्सत् ॥ यासंध्यासैवगायत्रीद्विधाभूता-
व्यवस्थिता ॥ संध्यामुपासतो येतुविष्णुस्तैःसमुपासितः ॥

॥ यज्ञोपवीतधारणविधिः ॥

यज्ञोपवीतमित्यस्य परमेष्ठी ऋषिः लिङ्गोक्तादेवतास्त्रिष्टुप्छन्दः यज्ञोपवीतधारणे विनियोगः ॥ ॐयज्ञोपवीतम्परमं पवित्रं प्रजापते-र्यसहजं पुरस्तात् ॥ आयुष्यमग्र्यं प्रतिमुञ्चशुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ ॐयज्ञोपवीतमसि यज्ञस्य त्वा यज्ञोपवीतेनोपनह्यामि ॥ आचमन प्राणायाम करी नवुं यज्ञोपवीत हाथमां लइ चन्दन पुष्पथी पूजन करी दश गायत्रीनो जप करी उपर कहेलो मंत्र भणी एक

यज्ञोपवीत धारण करवुं एम जेटलां पहेरवां तेटला वखत उपरने मंत्र भणी पहेरवुं.



॥ आशौचे सन्ध्योपासननिर्णयः ॥

सूतके मृतके चैव प्राणायाममन्त्रकम् ॥ तथा मार्जनमन्त्रांश्च मनसोच्चा मार्जयेत् ॥ गायत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेत् ॥ उपस्थानं नैव कार्यं मार्जनं तु कृताकृतम् ॥ सूर्यं ध्यायन्नमस्कुर्यात् गायत्रीजपो न कार्यः ॥ अर्घ्यान्ता मानसी सन्ध्या इत्युक्तेरिति धर्मसिन्धौ ॥


आचमन करी जननाशौच अने मरणाशौचमां सन्ध्या करवानो नियम एवो छे के गायत्रीमंत्र भण्या वगर फक्त प्राणायाम

करवो अने आपो ष्ठामयो एआदि मार्जनन मंत्रोने मनमां बोली मार्जन करवुं अने गायत्रीमंत्रने स्पष्ट उच्चारण करी सूर्यने अर्घ्य-प्रदान करवुं अने पछी उपस्थानज करवुं पछी सूर्यनुं ध्यान करी नमस्कार करवो. मानसिक दश गायत्रीनो जप करवो.

सुरत–चौटानो पूल टांकी पासे "शंकर" प्रिन्टींग प्रेसमां नारायणराव लक्ष्मणराव नीकमे छापी.







—: જીજ્ઞાસુઓના ઉપયોગ માટે છપાવી પ્રસિદ્ધ કર્તા :—

શેઠ ગીરધરલાલ ગુલાબચંદ.

(માણસા–મહિકાંઠા)

હાલ સુતારચાલ નં. ૬૫–૬૭, મુંબઈ–૩.



—: છાપનાર :—

નારાયણરાવ લક્ષ્મણરાવ નીકમ.

શ્રી 'શંકર' પ્રીન્ટીંગ પ્રેસ, ચઉટાબ્રોજ–સુરત.